श्रीस्वामिनारायणायनमोनमः ॥ अथकविर्वसंतादिवर्णयितुंतावत्तंनिरूपयति अथेति अथमुनिकुलस्तुस
नंतस्य यतीनांपरमहंसानांस्मरणंचिंतनंतस्मिन्नुचितोयोग्यः इययापरमकृपयासहितः सश्रीहरिः अभिनवो
नवीनउदयः प्रादुर्भावोयस्यसः हिमांशुश्चंद्रः जलनिधेः समुद्रस्येव शुभैर्मंगलकरैः चरितैराचरणैः श्रितजनस्य
स्वानमभक्तस्य निरंतरंसततम् मुदमानंदम् प्रथयति विस्तारयतिस्म द्रुतविलंबितवृत्तंलक्षणंतूक्तंप्राक् ॥ १
प्रथितेनेति प्रथितंसर्वलोकविदितंधर्मस्यकुलंवंशस्तस्यावनेरक्षणेनस्मरआसक्तः श्रुतिशिरांसिछांदोग्या

अथहिमांशुरिवाभिनवोदयः श्रितजनस्यमुदंचरितैः शुभैः ॥ जलनिधेः सदयः सनिरंतरंप्रथयतिस्मयतिस्मर
णोचितः ॥ १ ॥ प्रथितधर्मकुलावनतत्परः श्रुतिशिरोगणगीतमहायशाः ॥ जनसमाधिविधापनवीक्षणोनरमणी
रमणीयगुणार्णवः ॥ २ ॥

द्युपनिषदस्तेषांगणाः समूहास्तैर्गीतंगानविषयीकृतंमहायशाः सर्वप्रकारेणसर्वोत्कृ
ष्टकीर्तिर्यस्यसतथोक्तः जनानांजीवानांसमाधिविधापनेस्वमूर्तौचित्तनिरोधकारयितृवीक्षणमवलोकनंय
स्यसः येनदृष्टिपथमापुस्तेसर्वेतन्मूर्तौस्थिरचित्ताअभवन् नतुतस्यसमाधिविधापनेपात्रापात्रविचारः इत्थंभूतः
सः नरमणिरक्षरपुरुषोत्तमः रमणीयाः सर्वजनप्रियायेगुणावात्सल्यौदार्यादयस्तेषामर्णवः समुद्रः सः मुदंप्रथ

विनतयेति विनतयाविनयगुणयुक्तया अनिशंनिरंतरम् रतिभारभृताप्रेमभरवतावि जितंवशीकृतंसक्तंचा
पलदूषणंचंचलस्वभावरूपदोषोययातयातथोक्तया अमलयाविशुद्धयाकमलयालक्ष्म्याकर्त्र्यामलयाद्रि
जैर्मलयपर्वतोत्पन्नैः फलितैरतिसुंदरैः तिलकैश्चंदनवृक्षैः करणैः बकुलादरमतिप्रीतिपुरःसरम् अर्चितः
चंदनवृक्षैः पूजनासंभवाल्लक्षणयातत्काष्ठघर्षितमलयगुरुचंदनेनसप्रेमपूजितइत्यर्थः इत्थंभूतः समुदंप्रथ

विनतयारतिभारभृतानिशंविजितचापलदूषणयार्चितः ॥ फलितैस्तिलकैर्बकुलादरंकमलयामलयामलया
द्रिजैः ॥ ३ ॥ उभयमाश्रितलोचनलोभनंभृशमशोभतयस्यनिसर्गजम् ॥ वदननिर्मलचंद्रविमुग्धताकमलचारुणिचा
रुणिमापदे ॥ ४ ॥ अमितजीवविमोक्षविधिक्रियापटुयुतामिहभक्तिमरुत्तमाम् ॥ हरिरधर्मसमुद्रसमूलनः सवि
ततानतताननमंडलः ॥ ५ ॥

यतिस्मरेतिपूर्वेणानुषंगः ॥ उभयमितियस्यश्रीहरेः निसर्गजंस्वाभाविकम् आश्रि
तानांस्वभक्तजनानांयानिलोचनानिचक्षूंषितानिलोभयतीतितत्तथोक्तम् उभयंभृशमत्यंतम् अशोभत शुशु
भे किंतदुभयमितिचेत्तत्राह वदनंमुखमेवनिर्मलश्चंद्रोमृगलांछनात्मकदूषणरहितोविधुस्तस्यविमुग्धताम
नोहरताकमलवच्चारुणिसुंदरेपदेचरणयुगले अरुणिमारक्तिमाचेति ॥ ४ ॥ अमितेतिततंविशालमान

नमंडलंमुखमंडलंयस्यसतथोक्तः ससहजानंदोहरिः इहास्मिंल्लोकेऽप्रमिनाऽगणितायेजीवास्तेषांविमोक्ष
आसंतिकश्रेयस्तस्यविधित्सयाकर्तुमिच्छयाहेतुनाऽधर्मममधर्ममसर्गमुसमूलतः समूलंयथातथाउदस्य
समुत्साद्य वृषयुतांस्वस्ववर्णाश्रमोचितधर्मसहिताम् उत्तमांसर्वोत्कृष्टाम् भक्तिम् उरुबहुरूपयथातथाविततना
नविस्तारयामास॥५॥मधुरेतिविभुः क्षराक्षरव्यापकः गुरुः सर्वजनहितोपदेष्टासश्रीहरिः मधुरंमनोहरंकू
जितंव्याहृतंयस्यास्तयातथोक्तयाऽमृतभृताकोकिलया अभिनवस्तत्कालसंभूतः मधुर्वसंतइवमनोज्ञया

मधुरकूजितयाऽमृतभृताविभुर्मधुरिवाभिनवः सगिरागुरुः॥रुचिहासलवेनमनोज्ञयाभृतराजतराजतकां
तिना॥६॥अवजिताखिलदेशिकमुद्गलंकपटमत्सरमानमदान्वितम्॥सविजिगायविवादिगुरुव्रजंसकल
हंकलहंसगतिर्द्रुतम्॥७॥ मनःप्रियागिरावाचारजतंरूप्यमेवराजतम् व्रज्ञादित्वात्स्वार्थेऽणुप्रत्ययः तस्यकां
तिःशोभेवकांतिर्यस्यतेनतथोक्तेनरुचिरः सुंदरोयोहासोहसनंतस्यलवोलेशस्तेनचभूतामसेनम् अराजत
अशोभत॥६॥अवेतिकलहंसाः कादंबहंसास्तेषांगतिर्गमनमिवगमनंयस्यसः सश्रीहरिः कपटंछलस्य
मत्सरःपरोत्कर्षासहनंचमानःपूजेप्सुत्वमन्नत्वंचविद्याधनमदस्तत्रीयोभिजनोमदःमदागतेवलिप्तानां ॥३॥

विमुक्तलक्षणास्त्रिविधोमदश्चेतिद्वंद्वसमासः तैरन्वितंयुक्तम् अतएवउद्धतमुल्वणम् अतएवअवजिताः
व्याख्यकुरस्युक्तयापराभूताअखिलाःसमग्रादेशिकागुरवोयेनतंतथोक्तम् विवादिनःसच्छास्त्रप्रतिकूलं
विवदंतोयेगुरवोमहाखलाधिराजादेशिकास्तेषांव्रजंसमूहम् द्रुतंशीघ्रम् विजिगायविशेषेणजितवान्॥७
बुधेतिसश्रीहरिः बुधानामात्मारामाणामपिज्ञानिनांमनोहरयामनःकर्षिण्यागभीरयाऽतलस्पर्शयास्फु
टतराणपतितअक्ताविअक्षराणियस्यांसातथातथोक्तयासुधापीयूषमुपमायस्याः सातयातथोक्तयाश्रु

बुधमनोहरयासगभीरयास्फुटतराक्षरयानुदिनंगिरा॥प्रथयतिस्मसुधोपमयासतांश्रुवितयाचितयापर
निर्वृतिम्॥८॥मुनिगणैर्निगमागमवेदिभिर्नृपबुधप्रतयस्यसदीक्षितुः॥निजपदस्मृतिनिगणमसांतरैःपरं
मतारमतामसमानसैः॥९॥ चिंतयाश्रुद्धतयाप्राचितयायुक्तयागिरावाणयाऽनुदिनंप्रतिवासरम्सतांसज्ज
नानाम्परनिर्वृतिंपरमसुखंम् प्रथयतिस्मविस्तारयामास॥८॥मुनिगणैरितिनिगमावेदाःआगमाः॥त्रा
स्त्राणिचविदंतिजानंतीतितथोक्तास्तैः निजेस्वकीयेपदेचरणेतयाः स्मृतिरनुध्यानंतेनरीणानिनष्टानिम
लानिकामादिदोषायेषांतथाभूताम्यंतराण्यंतःकरणानियेषांतैस्तथोक्तैःअरमसंतंतमरवतामसंनवि

हरिसं- सर्ग-१५

॥ २ ॥

च्छनेतामसंतमसोगुणोयस्मिंस्तथाभूतंमानसंयेषांतैस्तथोक्तैः मुनिगणैः साधुवृंदैः सदास्तितुःसस्ततः यसश्रीह
रेःपरमतांसर्वोत्कृष्टतामभूत्रामसंतमव्बुधतबुद्धाकर्मलिलिट ॥ ९ ॥ सकलेतिश्रितजनानकरुणयादयया
वलोकयतोनिरीक्षमाणस्यसकलासमग्रामंजुलताचारुतातस्माःआस्पदंस्थानंवपुर्वपुर्यस्यसतथोक्तः हरेः
श्रीसहजानंदस्यचारुतरेरम्यतरेऽधरेऽप्योष्ठेअरुणोरक्तोयावको ऽलक्तकः सद्ववन्नो णिमाअसरुणत्वंभूत्रा

सकलमंजुलतास्पदवर्ष्मणो भूत्रामराजतचारुतराधरे ॥ श्रितजनानवलोकयतोहरेः करुणयारुणयावकवृो
णिमा ॥ १० ॥ न्रामनहृतकृतांतभयोज्झिताखमहसाजननाविदधेक्षितौ ॥ भगवतामनुजाकृतिधारिणाविभजिनाभ
विनामघहारिणा ॥ ११ ॥ निखिलविश्वजयातिमदोद्धतंभुविचरन्जनतोद्धरणायसः ॥ मनसिजंविजिगायसतापनिः
सुखरोरव रोदितदानवः ॥ १२ ॥ मसंतंअमराजतअवतोभत ॥ १० ॥ न्रामनेतिक्षितौभूमौमनुजस्यमनुष्यस्यआकृति
र्मूर्तिस्तांधरतीतितथोक्तेनविभवाः निसासिद्धदिव्यानंतैश्वर्याणिसंसमासौतेनतथोक्तेनभविनांसंसारिणामघ
घांस्यसंख्यजन्मपातकानिहरतीतितथोक्तेनभगवताश्रीसहजानंदेनसमस्तजनानांसमूहोजननतान्रामनोधर्मरा
जस्तस्माद्धताः भराः कृतांतःकालस्तस्मात्भयंतेनोज्झितावर्जितानाविदधेचक्रेकर्मणिलिट ॥ ११ ॥ निखिलेतिजना ॥ २ ॥

नांसमूहाजननतास्तासामुद्धरणायविमोक्षणायभुविक्षितौचरन्पर्यटन्सतांसाधूनांपतिर्गोप्तारवेणनादे
नशोदिताऽतस्तु विमोचनंकारिताअर्थात्पराभूतादानवादनुकृतायेनसतथोक्तः करैरवक्षरमुक्तरूपदेवेषु
वरःश्रेष्ठः सश्रीहरिः निखिलंसमग्रंयद्विश्वंतस्यजयस्तेनास्यतंयोमदोगर्वस्तेनोद्धतमनश्रंमनसिजंकामंवि
जिगायविशेषेणजितवानस्वप्रभावेणासंख्यजननान्नालिजितस्मरांतः सपत्नांश्चकारेतिभावः ॥ १२ ॥ समस्त
न्नितिन्रामेतः करणनिग्रहेहदमोबाह्येंद्रियनिग्रहस्तौआदीयेषांसाधनानांतैर्जितावशीकृतांइंद्रियवा

सममजन्मुनयोनिखिलेश्वरंन्रामदमादिजितेंद्रियवाजिनः ॥ परिहृताखिललोकविभूतयः कृतमखंतमख
डस्करवप्रदम् ॥ १३ ॥ तमधिगम्यनितांतरवैरिणः कुसुमचापमुखानितिकर्जयान् ॥ समतपश्चजनाबहवःक्षि
तौसुतपसस्तनयंविभुम ॥ १४ ॥ जितइंद्रियाश्वायैस्तेतथोक्ताः परिहृतास्यक्ताः अखिलानांसर्वेषांलोका
नांविभूतयः समृद्धयोयैस्तेतथोक्ताः परिहृतासक्ताः अखिलानांसर्वेषांलोकानांविभूतयः समृद्धयोयैस्तेत
थोक्ताः मुनयः निखिलानांब्रह्मादीनांसर्वेषांईश्वरोनियंतातंतथोक्तंअखंडमविनाशियत्कृतंतत्प्रददातीति
तंतथोक्तंकृतामखायज्ञायेनतंतथोक्तंतंश्रीहरिमसममजन्सम्यक्भजंतिस्म ॥ १३ ॥ तमितिकिंचेतिचार्थःक्षि

तौभूमौबहवोजनाःविभुंशरणागतानांनःत्रातुंनिवर्हणेसमर्थंकष्टंप्रपन्नानांतेनतपोयस्यसतस्यतथोक्तस्सतपसोधु॰
र्मस्यतनयंसुतंतंश्रीहरिमधिगम्यप्राप्यअतिदुर्जयानुसाधनैरपिजेतुमशक्यान् कुसुमानिपुष्पाण्येवचापं
धनुर्यस्यसकुसुमचापःकामःसमुखंसुखोयेषांतान् नित्याःस्वकीयायेअंतरंवैरिणोंतःशत्रवस्तान्समज
यन्नसम्यगनायासेंजितवंतः॥१४॥कमलेतिकमलंपद्मंकेतुर्ध्वजश्चयवश्चअंकुशश्चगोपदंचतानिप्रमुखा॰
निर्येषांतानितथाभूतानिलक्ष्माणिचिह्नानिययोस्तेतथाभूतेपदेचरणौतयोःक्रमणनिभासास्तैःकरणे॰

कमलकेतुयवांकुशगोपदप्रमुखलक्ष्मपदक्रमणैरिमाम्॥विदधतंवसुधामतियावनांपुरहितंरहितंप्रकृ॰
तेर्गुणैः॥१५॥अलिकदंबककदंबकसंवृतंकलितमालतमालदलद्युतिम्॥अपतुषारतुषारकरांबरंजितसमा
नविवर्जितम्॥१६॥ इमांवसुधांभूमिंअतिपावनामतिपवित्रांविदधतंकुर्वंतम्प्रकृतेर्मायायागुणैः सत्त्व
रजस्तमोभिः रहितंवर्जितम् परमुत्कृष्टमासंतिकंश्रेयोलक्षणंहितंयस्माज्जनानांतंतथोक्तम् यद्वापरेषांतत्कृ
ष्टाएकांतिकभक्तास्तेषांहितंमित्राणियस्यसतंतथोक्तम् अधिगम्यजनाःअंतरवैरिणःसमजयन्नितिपूर्वे
णसंबंधः॥१५॥अलीतिअलिनांभक्तानांकदंबंसमूहस्तस्यकंसुखंददातीतितथोक्तंस्तवहवोःसंख्याये ॥४॥



संतःसाधवस्तैर्वृतोवेष्टितस्तंतथोक्तं कलिताःधृतामालाःपुष्पादिहारायेनसतथोक्तःतमालस्यतापिच्छ
स्यदलंपत्रंतद्वद्द्युतिःकांतिर्यस्यसःसचासौसश्चेतितथोक्तं अपगतस्तुषारोहिमंयस्मात्सःतुषाराःहि
माःकरायस्यसःतुषारकश्चंद्रःसचासौचसदृशश्चशुभ्राणिअंबराणिवासांसियस्यसतथोक्तस्तेजिताःसमानाः
मानयुक्ताजनायेनसःसमानेनतुल्येनविवर्जितोरहितःसचासौसचतंतथोक्तंतमधिगम्यजनाःअंतरवैरि
णःसमजयन्नितिसंबंधः॥१६॥अथवसंतंवर्णयितुमुपक्रमते अथेतिअथेतिमिलोपक्रमतेकुत्रेनृ॰

अथकुत्रेनृपचारुविलोचनस्तमिवलोकयितुंवकुविस्मयात्॥नृपययौमधुरात्मवतांवरंघनरवंनरवंदित
पल्कजम्॥१७॥सकलपांथमनोवनपावकंमनसिजंप्रतिबोधयितुंभृशम्॥यमदिशोवतदानिदधेःनिलोवि
मलपामलयाचलसंभवः॥१८॥ यानिकमलान्येवचारूणिरम्याणिविलोचनानियस्यसतथोक्तःमधुर्वसंतः
आत्मविदामात्मज्ञानिनांमध्येवरंश्रेष्ठंघनद्धवरवोयस्यसतंतथोक्तंपदेचकजंपद्मंपल्कजंनरैर्वंदितंपल्कजं
पादकमलंयस्यसतंतथोक्तंतंश्रीहरिम्वकुविस्मयादतित्रायाश्चर्यात्लोकयितुंनिरीक्षितुमिवेसुस्त्रेक्षाउ
पययौसमाजगामप्रादुर्बभूवेसमर्थः॥१७॥सकलेतितदातस्मिन्समयेहिमावरणरहितत्वाद्विमलयानिर्मे

जयायमस्यपरेतभर्तुर्दिक्तयाद्दक्षिणदिग्गोऽसमर्थः पंथानंनित्यंगच्छंतीतिपांथाः सततमार्गगामिनः पथिषुएण
नित्यमितिपथिनऋतुराज्ञात्णप्रत्ययः पंथाद्देशाश्चसकलाः समग्रायेपांथास्तेषांमनांस्येववनानिविपिनानि
तेषांपावकोवह्निरूपस्तंतथोक्तं विरहिमनोदाहकत्वात्तस्मिन्ननलोपचारः मनसिजंकामंभृशंमसंतप्र
तिबोधयितुमुद्दीपयितुमिवमलयाचलात्संभवोयस्यसतथाविधोऽनलोमारुतोनिदध्रे धृतः कर्मणिलिट्
१८॥ रुचिरेतिरुचिरिणिपल्लवानिप्रवालान्येवतोरणानितैः राजिताः शोभिताः तैस्तथोक्तैः मधोर्वसंतस्यमह

रुचिरपल्लवतोरणराजितैर्मधुमहामहसद्मतुलांगतैः॥ विदधिरेपिमनस्कमहामुदः कुरवकैरवकैतवचेत
साम्॥१९॥ तिलकराजिकुरंगदृशांभृशंरुचिरलास्यविधिंदिशतिस्मयः॥ स्मरभिगंधिसमीरणमन्वयुस्तम
लयोमलयोमलयोत्थितमाकुलाः॥२०॥ महोमहोत्सवस्तस्मिन्सद्मतुलांगृहसाम्यंगतैः प्राप्तैः कुरवकैर्वृ
क्षविशेषैः अवगतंकैतवंकपटंयैस्तानितथाभूतानिचेतांसियेषांतेतथोक्तास्तेषांजितमनसामपिपुं
सांमनस्कमहामुदोवकृहर्षाः विदधिरेकृताः॥१९॥ तिलकेतियोवायुः तिलकानांवृक्षविशेषाणांराजयः
पंक्तयस्ताएवकुरंगदृशोमृगलोचनाः स्त्रियस्तासांरुचिरंसुंदरंयल्लास्यंनृत्यंतस्यविधिः कर्त्तव्यताप्रकारस्तं



दिशतिस्मप्रापदात् तिलकराजीश्चालयामासेत्यर्थः मलयादुत्थितः कुशलः अतएवस्मरभिर्मनोज्ञोगंधोय
स्यसस्मरभिगंधिः सभामांतेकारः सचासौसमीरणोवायुस्तंअलयोभृंगाः आकुलाः संभ्रांताः संतोऽन्वयुर
न्वगच्छन्॥२०॥ अपतुषारेतिअपगतस्तुषारोहिमंयस्मात्सः अपतुषारस्तस्यभावस्तत्तातयात्र्जुनंशुक्लं
रोचिस्तेजोयस्यसतेनतथोक्तेनतन्नीतमरीचिनाहिमकातिनाचंद्रेणचरकागच्छताउरतात्रासन्नायेअलयो
भृंगास्तैसंस्पृष्टेतितेनतथोक्तेनमलयाख्यायोभूधरोगिरिस्तस्मात्संभवोयस्यसचासौवायुश्चतेनच

अपतुषारतयार्जुनरोचिषाजगदनीयतनीतमरीचिना॥ मलयभूधरसंभववायुनाविचरताऽलिमल्ला
सुखम्॥२१॥ विकचकेसरकिंशुकचंपकप्रकरचारुतरंविपिनंमहत्॥ मदयतिस्मभृशंजनतामनः स्मरब
लंबलंपटषट्पदम्॥२२॥ गतस्मरखं आनीयतजगतिनुर्गमप्रापितम् नयतेः अकथितंचेत्यधिकरणावि
वक्षया जगच्छब्दस्यकर्मत्वात्द्विकर्मकत्वम् गोणेकर्मणिदुह्यादेः प्रधानेनीहकृष्वहामितिवचनात्स्मरस्व
स्यप्रधानेकर्मणिलिट्॥२१॥ विकचेतिविकचाः विकसितायेकेसराबकुलाः किंशुकाः पलाशाश्चचंपका
श्चांपेयाश्चतेषांप्रकरेणसमूहेनचारुतरमतिरम्यंस्मरस्यकामस्यबलंसैन्यभूतंकामोद्दीपकमित्यर्थः॥

रवेणाह्वेलंपटाः आसक्ताः ध्वनंतइत्यर्थः तथाभूताः षट्पदाः भृंगायस्मिंस्तत्तथोक्तं महत् विपिनंवनं
जनानांसमूहो जनतातस्याः मनोभृशमसंतमदयत्तिस्म ॥ ३२ ॥ कुसुमेतिकुसुमचापः कामः सएवमहीपति
र्नृपस्तस्यदर्शनमीक्षणंतस्मात् अतिमुदमतिहर्षंगतयाप्राप्तयाएवस्थितया जनैश्चिरंबहुकालंयाचिताप्रा
र्थितातयातथोक्तयारुचिरयारम्ययाकुसुमश्रियापुष्पशोभयाक्षितिरुहावृक्षाः सुतरामत्यर्थंविरेजिरे

कुसुमचापमहीपतिदर्शनादतिमुदंगतयेवविरेजिरे ॥ क्षितिरुहः सुतरांकुसुमश्रियारुचिरयाचिरयाचित
यातने ॥ ३३ ॥ किसलयैः कुसुमैरतिमंजुलैर्भृशमशोकतरुप्रभवैर्जनः ॥ स्मरबलैर्विदधेचमनोभुवः परव
शोगवशोभितकोकिलैः ॥ ३४ ॥ अथविलोक्यहरिः सुरभिश्रियंगृहजनैरमतेस्मसतांगणैः ॥ मधुमहोचितवे
षरूपेशालोरसमयेसमयेस्थितः ॥ ३५ ॥
सुशुभिरे ॥ ३३ ॥ किसलयैरिति अशोकतरुप्रभवैरशोकवृक्षोत
न्नैः अतिमंजुलैरतिचारुभिः स्मरबलैः कामसैन्यभूतैः कामोद्दीपकत्वादितिभावः किसलयैः पल्लवैः रवे
णशब्देनशोभिताः कोकिलायेषुतानितैस्तथोक्तैः कुसुमैः पुष्पैश्चजनोमनोभुवः कामस्यपरवशः परतं
त्रोविदधेचक्रेकर्मणिलिट् ॥ ३४ ॥ प्रसंगात्संक्षेपेणतस्यवसंतलीलांनिरूपयतिअथेतिअथवसंतप्रादु 

र्भावानंतरंसमये वेदोदिताचारेस्थितः समयाः शापथाचारकालसिद्धांतसंविदइत्यमरः मधोर्वसंतस्यमहउ
त्सवस्तत्रोचितोयोग्योवेषोनेपथ्यंतेनरूपेणालोऽतिरमणीयः हरिः सुरभेर्वसंतस्यश्रीः शोभातांविलोक्यनि
रीक्ष्यरसमयेप्रीतिमयेसमयेवसंतकालेगृहजनैर्गृहस्थजनैः सतांसाधूनांगणैर्वृन्दैश्चसहरमतेस्म अरम
त ॥ ३५ ॥ मधुरेतिमधुरोरम्योयोहासस्तस्यविलासः शोभायस्मिंस्तत्तथाभूतंमुखांबुजंमुखकमलंयस्यसत
थोक्तः कमलवत्शालिनीशोभमानेविलोलेचंचलेविलोचनेनेत्रेयस्यसतथोक्तः मणिमयानिमणिनिर्मि

मधुरहासविलासमुखांबुजः कमलशालिविलोलविलोचनः ॥ मणिमयोज्वलचंचलकुंडलः प्रविपदोघविप
दोघनिबर्हणः ॥ ३६ ॥ विपुलभालतलेदधदंचितेघुसृणचंद्रयुतोर्ध्वविशेषकम् ॥ विधिमुखैः परिसंभृतविग्र
होयुवतयावतयांचितदर्शनः ॥ ३७ ॥
तानितस्यविकारइतिविकारार्थेमयट्उज्वलानिचंचलानिचकुंडला
नियस्यसतथोक्तः प्रविर्लक्ष्मभूतोऽनिः पदेचरणेयस्यसतथोक्तः विपदोघसनाथोघः समूहस्तस्य
निबर्हणोनिरासकः हरिः गृहजनैः सतांगणैश्चरमतेस्मेतिपूर्वेणसंबंधः ॥ ३६ ॥ विपुलेतिअंचितेरम्येविपु
लेविशालेयद्भालतलंललाटोपरितनप्रदेशस्तस्मिन्घुसृणंकुंकुमंतस्यचंद्रस्तेनयुतः सहितोयऊर्ध्वं

विशेषकस्तिलकंदधत्नु वनेनिहर्षेविधिर्मुखैर्ब्रह्मादिभिर्योचितंप्रार्थितंदर्शनंयस्यसतथोक्तः युवतयायोव
नेनपरिसंभृतः पुष्टोविग्रहोदेहोयस्यसतथोक्तः हरिः रमतेस्मेतिसंबंधः ॥२७॥ वरगुलालकमिति किंचेतिचा
र्थः प्रमुदितेषुनद्वीलावलोकनेनरूष्यमानसेषुतेषुगृहितेषुसतांगणेषुच अंजलयश्च मुष्टयश्चताभिर्व
रगुलालकमुत्तमगुलालम्स्वार्थेकन्क्षिपन् अस्मन् वकुलो ऽतित्रायेयोरागो रंजनदुःखंरज्यते ऽनेनेतिखु
सन्ते: कर्त्तरिचकारकइतिकरणेघञ् घञिचभावकरणयोरितिरंजनेर्लोपः तत्पेषुतानितथोक्तानिया

वरगुलालकमंजलिमुष्टिभिः प्रमुदितेषुसतेषु चतैः क्षिपन् ॥ वकुलरागजलैःपरिषिक्तनस्थलगतिर्मुकुरु
क्षितविग्रहः ॥२८॥ इत्थंविहृत्याश्रितनामकारी स्नातुंहरिर्दुर्गपुरोपकंठे ॥ युतोगृहस्थैर्मुदितैर्मुनीद्रैरुन्मत्तगंगां
प्रययावनेकैः ॥२९॥ नित्तलानितैः करणैः स्वेनपरिषिक्तत: परिषिक्तैस्तैरूभयैः मुकुरुक्षितः सिक्तोविग्र
ग्रहोयस्यसतथोक्तः चलागतिर्यस्यसतथोक्तः सहरिः रमतेस्मेतिसंबंधः ॥२८॥ इत्थमिति आश्रितानांनाम
सुखंकर्तुंशीलमस्येतितथोक्तः हरिः इत्थमुक्तप्रकारेणविहृत्यविक्रीडयमुदितैर्हृष्टैः अनेकैरसंख्यैः गृह
स्थैर्मुनीद्रैश्चयुतः सन्स्नातुमुपगच्छ विनुदुर्गपुरस्यउपकंठंसमीपंतस्मिन्वर्त्तमानामितिशेषः उन्मत्तगंगांतरा लमानदीमुपययौजगाम ॥२९॥

पाश्चान्मेतिपश्चाज्जवः पाश्चासः दक्षिणापश्चासुरसस्यगितिसक् तथाभूतोयोदेवास्तस्मिन्प्रभवत्रसत्रिर्य
स्यसतस्मिंस्तथोक्ते उत्पलंतीप्रकान्नामानाकांचनस्यवल्गुः कंदरवल्गायस्यसतथोक्तस्तस्मिन्समुद्यसत्
त्रोभमानंपल्ययनंयस्यसतथोक्तस्तस्मिन्विचित्रोनानाविधः पदक्रमोपादन्यासोयस्यसतथोक्तस्तस्मिन्
मंडलधारा इतिप्रतीत्यर्थः आस्कंदितंधोरितकंरेचितंवल्गितंप्लुतमित्यमरः मंडलेर्भ्रमणैः रोचमानोविराजमा
नस्तस्मिंस्तथोक्तेतुरंगेऽश्वेस्थितउपविष्टः हरिः प्रययाविति पूर्वेणसंबंधः ॥३०॥ भास्वदिति भास्वतः सू

पाश्चास्यदेवप्रभवेतुरंगेस्थितोज्वलत्कांचनवल्गुवल्गो ॥ समुद्वसत्पल्ययनेविचित्रपदक्रमेमंडलरोचमाने ॥ ३०॥
भास्वत्करोद्भासितकुंतहस्तैरुच्चारयद्भिर्जयशब्दमुच्चैः ॥ वृतोऽश्ववारैः सभृत्यैश्चकास्तेगणैर्यथाहनामिववासुदेव ॥ ३१॥
अस्त्रान्वहंतस्यगृहीतमूर्तेः पद्माभिमर्गादसमानमभात् ॥ सकृत्सदस्पन्नमुपेसविद्योभोगीरथीमानमधिक्षि
पंतीम् ॥ ३२॥ यस्यकरास्तैर्मयस्तैरुद्भासिताः प्रकाशिताः कुंताआयुधविशेषायेषुतेतथोक्ताः हस्तायेषांते
स्तथोक्तैः उच्चैरुच्चस्वरेणजयइतिशब्दोजयशब्दस्तंउच्चारयद्भिर्वदद्भिः अश्ववारैः सादिभिः वृतोवेष्टितः सश्रीह
रिः यद्वन्नागणैर्हतोवासुदेवः श्रीकृष्णइवभृत्यमसंतंचकासेशुशुभे ॥३१॥ प्रसंगात्मांविशिष्टानपाथिनांअत्रेति

असतां अलभ्यादगम्यात् अत्रास्मिंल्लोके गरहीतातनस्त्रयो विधिस्तया धृता मूर्त्तिर्मनुष्यतनुर्येन स तस्य तथो
क्तस्य तस्य श्रीहरेः अन्वहं प्रतिदिनम् पदयोश्चरणयोरभिमर्शः स्पर्शस्तस्माद्धेतोर्विदग्धो मनस्सकृदेकवारं
पदस्पर्शं चरणस्पर्शम् उपेसप्राप्यजातमिति निश्चेयः भागीरथ्यां गंगायामानं विष्णुचरणस्पर्शाद्दहमेव सर्वथा
पूज्या वंद्या श्रेयस्करी निगर्वं प्रधिक्षिपंती तिरस्कुर्वतीम् तव तु महद्देव पुरुषोत्तमावतारस्य वामनस्य हरेः पद
स्पर्शो जातो मम त्ववतारिणस्तस्य सततं तत्संबंधो व रिविर्न्नितस्मान्मदग्रे किं तव महत्त्वमिति सधिक्षेपः ॥ २३ ॥ वि
विलोकनेनैव विनाशयंती पुंसामघौघं च कृजन्म जातम् ॥ स्नानाद्धरंतीं दुरितं प्रसिद्धां त्रिस्रोतसं फेनचयैर्हसंतीम्
२४ ॥ स्नानक्रियायाः परमस्य तस्य सार्द्धं मुनीन्द्रैः पयसि स्वकीये ॥ प्रसन्नवक्त्रैर्विविधैर्विहारैर्दर्पं हरंतीं तरणेः सु
तायाः ॥ २४ ॥ लोकनेनेति विलोकनेनैव दर्शनमात्रेणैव च कृभिरनेकैर्जन्मभिर्जातम् पुंसां दर्शनकर्तॄणाम्
अघौघं पापसमूहं विनाशयंतीम् अत एव स्नानादभिषेकात् दुरितं पातकं हरंतीं नाशयंतीम् प्रसिद्धां वि
ख्यातां त्रीणि स्रोतांसि प्रवाहाः यस्याः सा त्रिस्रोतास्तां त्रिस्रोतसं गंगाम् फेनचयैः फेनसमूहैः करणैर्हसं
तीम् ॥ २४ ॥ स्नानक्रियायाः इति स्वकीये निजे पयसि जले प्रसन्नानि वक्त्राणि मुखानि येषां तैस्तथोक्तैर्मुनीन्द्रै ॥ ८ ॥

र्मुनिवर्यैः सार्द्धं सह विविधैर्नानाविधैर्विहारैर्विलासैः परमस्य सर्वोत्कृष्टस्य तस्य हरेः स्नानक्रियायाः स्नान
करणाद्धेतोस्तरणेः सूर्यस्य सुतायाः पुत्र्या यमुनायाः दर्पं गर्वं हरंतीं विनाशयित्रीम् ॥ २४ ॥ तस्येति तस्य
धर्मदेवस्यात्मजः पुत्रस्तस्य तथोक्तस्य अखिलानां लोकानां भर्त्ता स्वामी तस्य तथोक्तस्य नारायणस्य तस्य ह
रेरंगस्य देहस्य संगः संबंधस्तेन विना यस्मात् लोके विश्रुते अन्या सा गंगाभिन्ना नानदी नाम हत्त्वमुत्कर्ष
त्वं महद्भिरंबुघोषैर्जलशब्दैः प्रतिसंवदंतीं निषेधंतीम् श्रीहरिः प्रययाविति पूर्वेणानुषंगः ॥ २५ ॥ कृषीव
तस्यांगसंगेन वृषात्मजस्य नारायणस्याखिललोकभर्त्तुः ॥ स्मातं विनाप्यन्य नदी महत्त्वं महांबुघो
षैः प्रतीसंवदंतीम् ॥ २५ ॥ कृषीवलैर्निर्मितकूपतोयैः संसिच्यमानैः पुलिनेषु सस्यैः ॥ ग्रीष्मेपि यस्या न परि
स्रजंति प्राज्यश्रियं तीरभुवां प्रदेशाः ॥ २६ ॥ लैरिति यस्या अनन्तगंगायाः पुलिनेषु तटेषु कृषीवलैः कृषिर्वैर्वृ
त्तिर्विद्यते येषामिति कृषीवलाः रजः कृष्याकृति परिषदो वलजि निमित्तार्थे वलच् वलइतिदीर्घः तैः निर्मिता
रचिता ये कूपास्तेषां तोया निजलानि तैः करणैः संसिच्यमानैः रुपमीयमानैः सस्यैर्धान्यैर्हेतुभिः ग्रीष्मे शुचा
वपि तीरभुवां तटभूमीनां प्रदेशाः प्राज्यविवर्षे सौभाग्यश्रीः नीलतृणादि जन्मायां शोभतां न परिस्रजंति न जहति २६

यत्रेति यत्र यस्यामुन्मत्तगंगायां हिमवदर्जुनाः शुभ्रास्ताभिस्तथोन्काभिः अर्जुनीभिर्धेनुभिराश्रिताः अधिष्ठि
ताः घासाः तृणादाः स्फुरम्याः अतिरमणीयाः ग्राष्पाः संसेविवितित्वाः स्थलाः हरिततृणवंतो देशाः नदग्रादाद्द्वल
मितिवालुरर्थिकोडुलच् आद्याद्वितान्तसि: कथंचित् केनचिस्त्कारेण बलाकाभिर्बकपंक्तिभिः बला का
बपंक्तिः स्याद्बलाकाविग्राकंविकेतिग्राम्भूतः साकंसार्धव्योम्नोनभसः पतिताः अंबुवाहोमेघाइवविभांतिरा
जंते ॥३७॥ कुलैरिति यस्या उन्मत्तगंगायाः समुच्चैरुन्नतानि रोधांसि तटानि परितः समंतात् ग्रानैर्मंदं मंदं

यत्राश्रिताः तृणस्थलतः स्फुरम्या हिमार्जुनाभिः परितोर्जुनीभिः॥ व्योम्नः कथंचित्पतिताविः।
भांति साकं बलाकाभिरिवांबुवाहाः॥३७॥ कलैर्हिमानीप्रतिमञ्जवीनां गवां व्रजैर्जङ्घिः परि
तः समुच्चैः॥ रोधांसि भांती वत्राणैरदभ्रं सकथ्थी निमंस्त्र वसनानियस्याः॥३८॥ जङ्घि हिमानी

हद्वि मंदं कुचकुरुणेस्या दिनाडीप् । हिमारण्ययोर्महत्त्व इति वचनान्महत्वेतत्वं निर्योगाद्दानुगागमश्च हिमानी
हिमसंततिरित्यमरः तया प्रतिमा तुल्या छविः कांतिर्यासां तास्तथोन्कास्तासां गवां धेनूनां कुलानि कदंबानि
तैः करणैः स्त्रसंतिगलंतिवसनानि प्रस्तानि तथोन्कानि सक्थीनि ऊरवइवादभ्रमतिग्रायं भांति विराजंते ॥३८॥ 

स्थिरासनैरिति यस्यामुन्मत्तगंगायां स्थिरैर्दृढैरासनैर्ध्यानकृतां मुनीनां वप्रा रोधांसि वप्रः पितरि केदारे वप्रः प्राकार
रोधसोरितिधरणिः रंतिद्वैवो तेषुवप विशेषैर्नियमणैः कदंबैर्हेतुभूतैरनिग्रं निरंतरं मरालवृंदैर्हंसकदंबैः श्रितस्य
मानसमित्याख्यामं द्रायस्य तत्तथोक्तस्य सरसः कासारस्य संबंधिनीमलक्ष्मीमनुशोभामदधातीति विभर्ति ॥३९॥ यु
ग्मेनाहवर्णमिति सलिलैर्जलैनिसर्गंजं स्वाभाविकं वलक्षं शुभ्रं वर्णरागं दधानां विभ्रती स्नानेनाप्लवेन धौतैः क्षा

स्थिरासनैर्ध्यानकृतां मुनीनां वप्रोपविष्टैरनिग्रं कदंबैः॥ यामानसाख्यस्य दधाति लक्ष्मीं मरालवृंदैः सरसः श्रितस्य
॥३९॥ वर्णं वलक्षं सलिलैर्दधाना निसर्गजं या तिलकैर्मुनीनाम्॥ स्नानेन धौतैः कपिलां तरंगैर्योपांगधौतैः पिष्टैर्मृस्त्रणां
नाम् ॥४०॥ सितैतरं चैणमदे रजस्रं प्रक्षालनेन त्रतिमद्युती नाम्॥ काषायरागं भृतामं वराणां विचित्रवर्णेति विभाति
युक्ता ॥४१॥ तिलकैर्मुनीनां तिलकैर्मुंडनैः कपिलां पीतवर्णं दधाना तरंगैर्योषाश्री हरिनिरीक्षणार्थं देवांतरैर्भग्नपा
गतारात्तयोक्तस्तासामंगेभ्यो वपवे भौधौतैः पिष्टैः कुंकुमैर्मसृणां लग्नैः एणमदैर्मृगमदैः कस्तूरिकाभिश्च
सितादितरो नील स्तं वर्णं च दधाना व्रतिनो वर्णिनः संतः साधवः यतयः संन्यासिनस्तेषां अंबराणां वाससामज
स्रं संततं प्रक्षालनेन धौतत्वेन काषायरागं च दधाना याउन्मत्तगंगा इति पूर्वोक्तप्रकारैर्विचित्रा विविधा ये वर्णरागा।

सैर्युक्तासती भृङ्गमसंतं भाति राजते ॥ ४२ ॥ तस्येति या उन्मत्तगंगा जललतानिकमलामेवोपहाराः पूजासामग्री
स्तैरुपपन्नैर्युक्तः उदारैर्महद्भिः तरलैश्चलैः वीचय एव प्रवेष्टाः करास्तैः करणैः तपः प्रसक्तैस्तपः परायणैरपि वां
छितमीप्सितं न तु साक्षात्सामस्त्यभूतमुदारस्य सर्वश्रेष्ठमहतस्तस्य हरेः पदारविंदं चरणकमलं समस्त्रानि ॥ ४३ ॥
प्रवालेति यत्र यस्यामुन्मत्तगंगायाम् सूक्ष्मैस्तनुभिः घनैः सांद्रैश्च फेनानां लवैर्लेशैः गौरैर्बिंदुभिरिति यावत् उपेताद्यु

तस्योपपन्नैर्जललतोपहारैर्वीचिप्रवेष्टैस्तरलैरुदारैः ॥ स्पृष्टमसुदारस्य पदारविंदं तपः प्रसक्तैरपि वांछितं या ॥ ४३ ॥ प्र
वालताम्रा व्रतती प्रवालाः सूक्ष्मैर्घनैः फेनलवैरुपेताः ॥ यत्राधरस्योत्तरलदंतरोचिर्भूतो हरेः संस्मरयंति भक्तान् ॥ ४४ ॥
स्वलत्तरंगं चलवातनीतैः सरोजकिंजल्कचयैरुपेतम् ॥ यस्यैकतं चारुविचित्रवर्णं तरंगितं चेलमिवोच्चकासे ॥ ४४

क्ताः प्रवालानि विद्रुमास्तानीव ताम्रा रक्ता व्रततीनां लतानां प्रवालाः पल्लवाः भक्तान् कर्मभूतान् उज्ज्वलानि यत्रा
निदंतानां रोचीषि कांतयस्तानि च भक्तीति तथोक्तस्य हरेः संबंधिनो ऽधरस्योष्ठस्य तत्सिमर्थ्यः संस्मरयंती रक्षायां क
र्मणि षष्ठी ॥ ४४ ॥ स्वलंत्तरंगमिति स्वलंतो विचलंतस्तरंगा यस्मिंस्तत्तथोक्तम् चलैश्चुंचलैर्वातैर्नीताः प्रापिताः
स्तथोक्तैः किंजल्कानां कमलरजसां चयैः समूहैः उपेतं युक्तं ऽतएव चारुः कमनीयो विचित्रो नानाविधश्च वर्णो 

यस्य तत्तथोक्तम् यस्यास्तुन्मत्तगंगायाः सैकतं तटम् तोयोत्थितं तत्पुलिनं सैकतं सिकतामयमित्यमरः तरंगा भंग्यः
संजाता अस्येति तरंगितं भंगीमत् तारकादित्वादितच् चेलं वसनमिवोच्चकासे विरेजे ॥ ४४ ॥ विधूयेति वृंदारका
देवास्तेषामीशैर्ब्रह्मादिभिः अभिवंदितायां संस्तुतायाम् यस्यामुन्मत्तगंगायाम् वातेन मरुता विधूय चालयित्वा
वितायमानं विस्तीर्यमाणम् पर्वणि अमावास्यायां जातः पार्वणः तत्र जात इत्यण् सचासौ चंद्रश्च तद्गौरं शुभ्र
म् अपांजलानाम् फेनं च प्रहासमट्टहास्यमिव विराजते भ्राजते ॥ ४५ ॥ पुन्नागैरिति पुन्नागा नागकेसराः चांपेयाश्च

विधूयवातेन वितायमानं यस्यामपांपार्वणचंद्रगौरम् ॥ विराजते फेनमिवप्रहास्यं वृंदारकेशैरभिवंदितायाम् ॥
४५ ॥ पुन्नागचांपेयकदंबनीपैः स्वर्णरंभासहकारमुख्यैः ॥ याभाति रम्योपवनैरुदारैस्तटांतिकस्थैर्महसांजैरुपेतैः ॥
४६ ॥ यकाम्रकदंबाश्च नीपाश्च कदंबनीपयोरवांतरभेदेन पृथगुपनिर्देशः तैः स्वर्णरंभाः कनककदल्यः सहकारा
आम्रवृक्षाश्च ते मुख्याः येषां ते तथोक्तैः महीजैरनोकहैः उपेतैर्युक्तैरुदारैर्महद्भिः उदारो दातृमहतोरित्यमरः तटानां
पुलिनानामंतिकेषु समीपेषु तिष्ठंतीति तटांतिकस्थानि तैस्तथोक्तैः रम्याणि रमणीयानि यान्युपवनान्यारामा
स्तैः करणैः आरामः स्यादुपवनं कृत्रिमं वनमेव यदित्यमरः योन्मत्तगंगा भाति विद्योतते ॥ ४६ ॥

मुक्ताभिरितियस्यात्उन्मत्तगंगायाः सिकताः संसक्तिन्निति सिकतं ततं दंसिकतान्नार्कराभ्यांचेतिमत्वर्थे ॥ एणप्रस॰
यः ॥ अंबुनोज्जलस्यरयोवेगस्तेननोदिताउत्क्षिप्ताः शुक्तयो मुक्तास्फोटास्ता एव पेन्यंपः कोन्याः पुटाद्तियावत् मु
क्तास्फोटः स्त्रियांशुक्तिपेन्यां कोन्याः पुटः शुक्तिरित्यमरः ताभिर्मुक्ताभिरुन्मृष्टाभिर्मुक्ताभिर्मौक्तिकैः ॥ अथ मौक्ति
कंमुक्तेत्यमरः ॥ आप्तोलब्धः परभागोगुणोत्कर्षो येन तत्तस्यभावस्तत्तातयाहेतुभूतयापरिविन्न्याणेविलिम्नेर्वल
क्षैः शुभैर्हरिः ॥ अतिभास्वरतातिराजमानस्य पल्यंकतोमंचकस्यसहद्यानांतुल्यतां बभारदधार ॥ तमेवंपूर्णावसंतति

मुक्ताभिरंबुरयनोदितशुक्तिपेन्यां मुक्ताभिराप्तपरभागतयाबभार ॥ पल्यंकतंपरिविन्न्याणेविलक्षहारैः पल्यंकतः
सद्दृशनामतिभास्वरस्य ॥ ४७ ॥ तंविस्फुरत्कुलसंचयधूतकंजानिष्यंकतीरधरणीस्खलितोर्मिपंक्तिः ॥ उन्मत्तसिंधु
रमलाकलहंसनादाप्यासेवनीरमवगाहितुमाजुहाव ॥ ४८ ॥ लकाहलंलक्षणंतूक्तंप्राक् ॥ ४७ ॥ तमितिविस्फुरंतश्च
लंतोयेन्याकुलामीनास्तेषांसंचयः समूहस्तेनधूतानिकंपितानिकंजानिकमलानियस्याः सातथोक्तासदजलुस्खवी
क्षणोक्तिरियम् निष्यंकाकर्दमरहिताविहारयोग्येतियावत् यातीधरणीतटभूमिः स्खलिताविचलिताक्रमाणां
तरंगाणांपंक्तिर्यस्याः सेतिकरसंज्ञोक्तिः कलहंसानांकादंबानांनादोयस्याः सातथोक्तेतिवचनव्यापारोक्तिः ॥ अन ॥११॥

एवामलाश्चरू उन्मत्तसिंधुरुन्मत्ताख्यासरित् तंश्रीहरिम् नीरमवगाहितुमुपयोवगाहम् गाढ्तेरू दिता हिकुस्ये
नेदृषी माल्याजुहावेवाकारयामासेवेसुत्प्रेक्षाहूतिराकरणान्हानमित्यमरः कृयतेर्लिट्अभ्यस्तस्यचेतिसंप्रसार
णम् ॥ ४८ ॥ आयांतमितिअंचितारम्यागतिर्यस्यतंतथोक्तं आयांतमागच्छंतं तंश्रीहरिम् प्रसमीक्षमाणाविलो
कयंतोहंसामराला: विस्मितासंतोगतानिगमनानिनविदधिरेनचक्रुः लज्जयेतिभावः तथाहिपरमश्चागसोजनस्यने
नविजीयमानम् विशेषेणपराभूयमानंस्वकीयमात्मीयंगुणंअवबुध्यज्ञात्वापीसूर्थ्यः कोनिस्त्रपोनिर्लज्जः सन्

आयांतमंचितगतिंप्रसमीक्षमाणाः स्तंविस्मितानविदधिरेनगतानिहंसाः ॥ कोनिस्त्रपः परतनेनविजीयमानंकुर्या
त्समक्षमवबुध्यगुणंस्वकीयम् ॥ ४९ ॥ उत्क्षिप्तविस्फुरितनीरतरूहार्घ्यमुच्चैः सस्नेहमंडजरवैरिवन्यालयंती ॥ फे
नप्रहासरुचिरातनुतेस्मतस्यप्रोत्सेवयाध्रमतिलोलतरंगहस्तैः ॥ ५० ॥ समक्षंप्रसक्षंकुर्यादाविकुर्यादित्यर्थः न
श्रिदपि अत्रतिरस्कारांविवेकितानिग्रायीन्नरागमननिषेधस्तत्समर्थनार्थोपमर्थान्तरन्यासनामालंकारः ॥ ४९ ॥
उत्क्षिप्तेति उत्क्षिप्तमुद्धृतंविस्फुरितंविकचंपन्नीरजंकमलंतदेवार्घ्यमर्घदुन्मंयस्मिंस्तत्तथोक्तंसस्नेहंसप्रेमयप्र
यातयाअंडजरवैः पक्षिस्वनैरुच्चैरालपंतीवस्थितेत्युत्प्रेक्षाफेनएवप्रहासस्तेनरुचिरारम्याञ्चितपूर्वाभिभावि

हरिसं· णीत्यर्थः सोऽमलगंगापीसा तस्य श्रीहरेः अतिलोलाः अतिचपलास्तरंगा वीचय एव हस्तास्तैः पाद्यं पादोदकं सर्ग·१५
॥१३॥ षट्स्कु त्रिषष्ठ्यर्घमर्घार्हे पाद्यं पादाय वारिणी स्यमरः पादाभ्यां चेति यत्स्वस्थः ननु ते स्मै वेति रूपकानुपपत्तिस्तत्रेक्षा
द्वयसंकरः सापेक्षत्वात् ॥५०॥ अथ सलिलक्रीडावर्णनमारभते सिंचन्निति युग्मं आप्तः प्राप्तो हर्ष आनंदो यैस्तै
स्तथोक्तैस्तत्क्रीडावलोकनात्संतुष्टैरित्यर्थः कुसुमवर्षिभिः पुष्पवृष्टिं कुर्वद्भिः वैमानिकाः विमानैश्चरंती वैमानिका
देवाः चरतीति ठक् तस्मैकादेशाच्छ्रुतेरीड्यमानः स्तूयमानः सः श्रीहरिः तस्यां नद्यां प्रविश्य अंजलिनांजलिभिः सिंचन्

सिंचन् प्रविश्य तत्र अमलं जलिना तत्र तस्यां तानुसिंचयन्नपि परस्परमीड्यमानः ॥ वैमानिकैः कुसुमवर्षिभिरात्तहर्षैस्तैः
र्गापयन्मधुरकेशवकीर्तनानि ॥५१॥ मध्येप्रवाहमभितः प्रसमीक्षमाणस्तान् संस्थितः पुरुहृषन्मयतुंगदे
शे ॥ रेमे स्वकीयलपनैकहृद्व्यानदीष्णः कुम्भासमांतरनिवेशितपादपद्मः ॥५२॥ स्वनु तानुसदादीनुस्वाश्रितान्
पिपरस्परं सिंचयन् नैर्मधुराणि यानि केशवस्य कीर्तनानि तानि गापयन्सन् रेमे चिक्रीडे ॥५१॥ मध्येप्रवाहमि
ति प्रवाहस्य मध्यं मध्ये प्रवाहं पारे मध्ये षष्ठ्या वेत्यव्ययीभावः मध्यशब्दस्य निपातनादेत्वम् पुरुर्बहुर्हृषद्
शिलाः प्रचुरास्ताः यस्मिन्स तथोक्तः तुंगउन्नतश्च यो देशस्तस्मिन् संस्थितो निषण्णः कुंभाहृत्रिमानदी कु ॥१३॥

म्भास्यात्हृत्रिभानदी स्यमरः तयासमं तुल्यं यदंतरमवकाशस्तस्मिन्निवेशिते पादपद्मे येन स तथोक्तः नद्यामु
न्मत्तगंगायां स्नातीति नदीष्णः कपीतियोगविभागात्कः निनदीभ्यां स्नातेः कौशले इति षत्वम् नदीस्नाने कुशल
इत्यर्थः स्वकीयं लपनं मुखं तस्मिन्नेकैकेचलोहृन्नोनेत्राणि येषां तान् तथोक्तान् तान् भयान् अभितः परितः
प्रसमीक्षमाणो विलोकमानः सन् रेमे ॥५३॥ तस्मिन्नितिजले विहारे विलासस्तत्र विशारदो निपुणास्तस्य तथो

तस्यांसयोर्जलविहारविशारदस्य श्रीमन्नवांबुधरभास्करयोः प्रसक्तम् ॥ मुक्ताफलोज्ज्वलरुचस्तरलाः पतं
सोरेजुर्भृशं भुजगराजफणाद्वयाय ॥५४॥ तस्मिन्नतसिन्धुतततरंगपद्मांकराभ्यां यं निपातयति तं तमुदारलीलः
पारिप्लवेक्षणयुगेन सवीक्षमाणस्तेनोह्यमानमनवस्थितमुज्जहास ॥५५॥ कस्य तस्य श्रीहरेः श्रीमान्नवो
योंऽबुधरो मेघस्तद्वद्भास्करे शोभमाने तयोस्तथोक्तयोरंसयोः स्कंधयोः प्रसक्तं निरंतरं यथा तथा पतंतो मुक्ता
फलवदुज्ज्वला रुचः कांतयो यासां तास्तथोक्ताः तरलाश्चलाः आपो जलानि भुजगानां सर्पाणां राजे निभुजगरा
जः शेषस्तस्य फणाभोगाद्भ्रमं भ्रममतिशयं रेजुः रुरुचिरे ॥५४॥ तस्मिन्नतसिन्दाराम हंसो मोक्षदायिमोचाली
लाविहारायस्य स तथोक्तः स श्रीहरिः तस्याउन्मत्तगंगायाः स्रोतः प्रवाहस्तस्मिन् यं यंभक्तजनेपदनः पदा

भ्यांकराभ्यांवाद्युत्तरमतित्तूर्णम् निपातयति तेनस्रोतसोह्यमानमाकृष्यमाणम् अतएवानवस्थितंभव
स्यारहितंव्याकुलमितियावत् ततंभक्तजनंपारिप्लवंचंचलंपदीक्षणयुगंनेत्रयुगलंतेननिरीक्षमाणः सन्
उत्तहासतत्कूतूहलालोकनलीलयोच्चैर्हसतिस्म ॥५४॥ प्रीसेतिहृतासुरूणांबद्धनिकृष्टहृतानियुएपा
निषेस्तेतथोक्ताः तेभक्तजनाः पूतामंतः करणत्रांधकानितस्यश्रीहरेरंघ्रियुगयोः पादयुग्मयोः संबंधी
निभवंसंसारमपघ्नंतिनिवर्त्तयंतीतितथोक्तानिक्लिष्टेतिक्लिपु सलिलानिप्रयांसिनिर्धौतानिर्णिक्तानि

प्रीसालदंघ्रीयुगयोः सलिलानिभूयः पूतानितेनिजकरांजलिभिः पिबंतः ॥ निर्धौततत्तनुजलानिभवापह
निसप्तांकृतोत्कटकृताः सहतेनरेमुः ॥५५॥ आत्ताविघ्रस्यपतिसारभुजाहृतानांवारांमृदंगरवसन्निभ
तामुपेताः ॥ कादंबसारसविनादयुजोविरावागानेस्यमांगलिकतूर्यमुदंवितेनुः ॥५६॥ सश्रीहरेः तनुधैस्ता
नितथोक्तानियानिजलानितानिचनिजाः स्वकीयायोः करांजलयस्तैः प्रीसाभूयोमुहुः पिबंतः संतस्तस्या
नंद्यां तेनहरिणासहरेमुः ॥५५॥ आत्ताविघ्रदतिमृदंगस्यघोरवः नादस्तेनसन्निभतांतुल्यतामुपेताः पापाः
कादंबाः कलहंसाः सारसाश्चतेषांयेनिनादारवास्तैः युंजंतीतितथोक्ताः आत्तास्तालुगतादंष्ट्रातयावि



ष्णोनजीवतितत्रविषमेषांतेतथोक्ताः आत्ताविषाः सर्पाः पृषोदरादित्वात्साधुतेषांस्यपतिरधीनाः शेष
स्तदूक्ताशेवलंयघोस्तौतथाभूतौयौभुजौताभ्यामाहृतास्ताडितास्तासाम् वराममपांविरावाः नादाः गाने स्यश्री
हरेः मंगलंप्रयोजनमस्येत्याप्तितितथोक्तानिप्रयोजनमितिठकुतस्यैकादेतूर्यवृत्तथाभूतानियानितूर्याणि
वाद्यानितैः यामुत् हर्षस्तांवितेनुर्विस्तारयामासुः ॥५६॥ व्यालोलतिव्यालोलेचंचलेयेलोचनेतयोर्विलासः
कटाक्षरूपस्तेनललामंप्रधानंश्रेष्ठंसर्थैः लीलानांभायस्यतत्तथोक्तप्रधानध्वजशृंगेषुपुंड्वाललधिस

व्यालोललोचनविलासललामलीलंतस्याननंविन्नादकरद्वंदतुष्टम् ॥ उत्फुल्लनूतनसरोजमधश्चकारस्वी
यश्रियातुलितयासतुषारलेन्नम् ॥५७॥ निर्धौतपत्ररचनेरमणीयवक्रेपाथोभरादतितरामवलंबिनीभिः ॥
चित्रच्छविः कृत्तरतः कपिशांतराभिस्तस्यतानिचिकुरप्रस्कवल्लरीभिः ॥५८॥ क्षमस्तभूषावात्तिप्रभावेयुललाः
मंस्पादत्रलाममेवेतिरूढः विन्नादाः शुभ्रायेनाकराजलकणास्तेषांवृंदेनतुष्टंप्रेवितंतस्यश्रीहरेः आननंमुखंस्व
तुलितयाअसदृशयास्वीयश्रियानितत्रांभयातुषारस्यहिमस्यलेन्नाणविंदवस्तैः सहवर्त्तमानंउत्फुल्लंप्रफुल्लंप
नूतनंनवीनंसरोजंकमलमधश्चकारतिरश्चकार ॥५७॥ निर्धौतेतिनिर्धौताक्षालितापत्ररचनायस्यतत्तथो

कंतस्मिन् तस्यश्रीहरेः रमणीयं रम्यं पद्मकं मुखं तस्मिन् पाथसामंभसो भरो भारस्तस्मात् अत्यंतिरामदम्भमुक्त
वलंबिनीभिर्विलंबमानाभिरित्यर्थः अंबुजानां पद्मानां रजोभिः कपिशानि पीतानि अंतरालमध्यभागायासां ला
ताभिस्तथोक्ताभिः चिकुराणां केशानां यामग्राणि तान्येव कटुचटुलपंक्तिलतास्ताभिः चित्रस्यपत्ररचना वित्रो
षस्य छविः शोभा मतानि संध्यादिता विपूर्वा तनोतेः कर्मणि लुङ् अत्र चित्रस्य छविरिव छविरिति निदर्शनाभेदः
५८॥ अस्येति चलंतस्तरलास्तरंगा यस्मिंस्तत्तथोक्तं तस्मिन् पयसि जले महे सलभरविंदं कर्तृ अरविंदं म

अस्योत्तमेन च महोत्पलमाननेन नैकं जितं कुवलयं रभसान्ननर्त ॥ इत्थं पयस्यदिकृतेरिवगायकश्चैर्नेत्रश्रियावक्र
लयापि चलन्स्तंसो॥५९॥

होत्पलमितिसमरः अस्य पुंसः उत्तमेनोत्कृष्टेन आननेन मुखेन एकमहमेव न जितं किंतु वक्र
या अधिकया नेत्रश्रिया लोचनशोभया कुवलयमपि जितम् इत्थं रभसाद्धर्षाद्धेतोः अधिकृतैः उच्चैर्गायन्सन् अधिक
तगानं कुर्वद्भिरिति रूपम् इत्थं भूतलक्षणे तृतीया ननर्त नृतेः खंपंचभिः सहेतिमायात् कमलनिस्येव अत्र तरंगच
लनहेतुके महोत्पलचलने सालिनादेहर्षहेतुक गानन्नसत्वात्स्वेक्षणाक्रियानिमित्ताक्रियास्वरूपोत्प्रेक्षावाच्या ५८

पाथोरुहाणि निश्रियाशोभया पाथोरुहाणि कमलानि परितस्त्यजता परिभर्त्सयता तेभ्योतिरमणीयेनेत्यर्थः
स्मितवता मंदहास्ययुक्तेन प्रतिमां प्रतिबिंबं गतेन प्रतिमानेन प्रतिबिंबमितिसमरः तस्यश्रीहरेः मुखेन अलंकृत
नामंभांसि जलानि यस्याः सा विहितः कृतस्तदुपकारो विहारानुकूल्यरूपो यया सा इत्थं तेनोपकृतास्वयं चतस्योप
चिकीर्षुरित्यर्थः अमला निर्मला उन्मत्तसिंधुः प्रसादस्य स्वच्छत्वस्य सफलत्वं अन्वर्थं गौरवं तत्पष्ठी समासनिर्वा
हः लेभे प्राप स्वच्छा एव परैरुपक्रियंते स्वयं चोपकुर्वते तेषामिति भावः अत्रोन्मत्तसिंधुविशेषणपदार्थस्य स

पाथोरुहाणि परितस्त्यजता मुखेन तस्यश्रिया स्मितवता प्रतिमागतेन ॥ उन्मत्तसिंधुरमला विहितोपकाराद्वे
भेप्रसादसफलत्वमलंकृतांभाः॥६०॥ रम्याननं शिरसितप्रकरैर्नितांतं तस्याकुलैर्जलविगाहनतो हृल्लांतम्॥
जिग्ये द्विरेफनिकरांतरितं पयोजं मुग्धस्मितं सितपरागयुतं प्रफुल्लम्॥६१॥ फलत्वं प्रतिहेतुमत्वा काव्यलिं
गमलंकारः॥६०॥ रम्याननमिति जलेषु विगाहनतो विगाहनात्स्वेच्छाद्धेतोः नितांतमत्यंतम् आकुलैर्विकी
र्णैः शिरसि तप्रकरैः केशसमूहैः हृल्लांतं हृल्लाश्लथा अंताः प्रांता यस्य तत्तथोक्तम् तस्यश्रीहरेः मुग्धं रम्यं स्मि
तं यस्मिंस्तत्तथोक्तं यदाननं मुखं तम् द्विरेफाणां भृंगाणां निकरः समूहस्तेनांतरितं संतातावरणाम् सिताः शुभ्रा

येपरागाः पुष्परजांसि तैर्युतं प्रफुल्लं विकचं पयोजं कमलं जिग्ये जयति स्म ॥ ६१ ॥ आलोक्येति जले विहारः क्रीडा
तेन गतो नष्टः अंगरागो यस्मात् तम् निस्सन्को निजजलविहारानुकूल्यविघातकतया विमृष्टा निमंडना निर्येन तम्
तथोक्तं स्वं तथापि श्रियं शोभाम् आदधानं बिभ्राणं शोभाकारणाभावेपि शोभमान इति विभावनालंकारः ॥ तं
श्रीहरिं विलोक्य प्रीतैः प्रसन्नैः भक्तैः मनोरमेण रम्येण तस्य श्रीहरेर्विग्रहेण देहेनैव विभूषणमलंकृतं न तु
विभूषणेन तद्वपुरिस्मिक्ष्यसार्थः इति समबोधि बुबुधे कर्मणि लुङ् स्वभावरम्याणां किं विभूषणैरिति भावः ॥ ६२

आलोक्य तं जलविहारगतांगरागं निस्सन्कमंडनमपि श्रियमादधानम् ॥ प्रीतैर्विभूषणमलंकृतमेव भक्तैस्तद्वि-
ग्रहेण समबोधि मनोरमेण ॥ ६२ ॥ निर्धौतचारुतिलकाः परिमृष्टहारास्तस्यावधूतचिकुराः सभयाइवापुः ॥ आग-
स्कृतोतिनृपयोगमुपेयिवांसः कंपं मुहुर्भगवतः स्फुततरं तरंगाः ॥ ६३ ॥ निर्धौतेति निर्धौतं क्षालितं चारु सुंदरं तिल-
कं यैस्ते परिमृष्टा मार्जिता हारा येभ्यस्ते अवधूता विक्षिप्ताश्चिकुराः केशा यैस्ते भगवतः सर्वनियमनसमर्थस्य तस्य हरेः अ-
तिनिर्भयपयोगं वक्रप्रसंगं उपेयिवांसः प्राप्तवंतः तरंगा ऊर्मयः आगस्कृतो मंडनखंडनरूपापराधकारिणः अतएव
स्फुततरामत्यंतं सभयाइव तस्माद्भीताइव मुहुः कंपम् आपुरीयुः स्वाभाविकस्य कंपस्य भयहेतुत्वमुत्प्रेक्षते ॥ ६३ ॥



तस्येति निद्युतित्वंगोभांते जलक्षोभ्य हंतः प्रचुरवेगिभिर्वक्रवेगवद्भिर्जलैर्जडैश्च डलयोरभेदात् यद्वा जलं गोलकरेनीरे
क्षीवरेच जडेम्मवदिति विश्वः प्रलोभात् मोहादिवाहता गृहीताः विपुलाधिकाया स्तुतिः स्तवनं ताम् आप्नुवंतः ॥
प्राप्ताः अस्मत्र धनग्रहवंधनादिपीडां प्राप्ताः अतएव खलु सभासीनष्टकांतयः तस्य श्रीहरेः उत्तंसकाः कर्णपूराः ॥
अत्र लोके भ्रष्टोऽधिकारो येषां ते तथोक्ता येषु सेवा अमासाद्य वनग्राम्यत्वं शोकास्पदत्वं ययुः प्रापुः ॥ ६४ ॥ आ-
वानिति ध्वस्तः प्रनुग्मितल्मातपस्योहर धिको भिभवो येन स तथोक्तः नाशितो दमवाधः ज्ञानेर्मंदं आवानुवद

तस्याहताः प्रचुरवेगिजलैः प्रलोभादुत्तंसकाइव ययुर्द्युतिमुद्वहंतः ॥ शोच्यत्वमत्र विपुलस्तुतिमाप्नुवंतो
भ्रष्टाधिकारमसिवाइव खलु सभासः ॥ ६४ ॥ आवाद्धनैः परिगृहीततुषारसारोध्वस्तातपोऽभिभ-
वः परिमृष्टवार्त्तः ॥ तस्मैददावितितरंगचरैः समीरो हस्तावलंबनमिव प्रभवेनुयायी ॥ ६५ ॥ नू आद्य पू-
र्वोद्धातेर्घटतस्य अनुग्राह्य देवाः परिमृष्टानि विलोकितानि वार्त्तानि कमलानि येन स तथोक्तः पद्मगंधिरित्यर्थः
तरंगेषु चरतीति तथोक्तः चरेष्ट इति टप्रत्ययः अतएव परिगृहीतस्य तुषारस्य नीकरणां वारः समूहो येन स तथो-
क्तः समीरो वायुः प्रभवे स्वामिने अनुयायी भुजिष्य इव तस्मै श्रीहरये हस्तावलंबनं ददाविवेत्युत्प्रेक्षा ॥ ६५ ॥

हस्तेति किंचेति चार्थः हस्ताभ्यामवघूर्णितमूर्ध्वोत्क्षिप्तं जलं येन न सतथोक्तस्तस्य विहर्तुर्विहरणवृत्तिजस्य तस्य
हरेः उरस्तदुरसि वक्षःस्थले परितः सर्वतः पतत्सु कणीकरेषु कणीकराणां मध्ये निष्पंदमानो विगलयमानः अ
तएव छिन्नोपि स्वयं छेदनधर्मोपि विविक्षिपि दिच्छेदः कुरुतेति कुरवुप्रसयः रुचिरो हारो न संलक्ष्यते कणीकरसं
गात् छिन्नइति न ज्ञायते इति भावः ॥ ६६ ॥ विभ्रंत्रिणो विति जले विहारस्तत्र रतः प्रीतिमान् तस्य तथोक्तस्य

हस्तावघूर्णितजलस्य हरेर्विहर्तुर्मुक्ताफलप्रतिनिभेषु कणीकरेषु ॥ निष्पंदमानमुरसः परितः पतत्सु सं
लक्ष्यते न रुचिरश्छिन्नोपि हारः ॥ ६६ ॥ विभ्रंत्रिणो वरशिरीषकमाचतंसो पारिप्लवो जलविहाररतस्य तस्य
श्रीकर्णतश्चलयतः स्फुतरामुदारे शैवाललोलकुलोम्नतरिनीप्रवाहे ॥ ६७ ॥ तस्य श्रीहरेः श्रीकर्णतः श्री
भायुक्तकर्णाभ्यां विभ्रंत्रिणोपतितौ उदारे महति तरिनीप्रवाहे नदीपूरे पारिप्लवो चंचलो चंचलं तरलं चैव पा
रिप्लवपरिप्लवे इत्यमरः वरशिरीषस्कमावतंसौ श्रेष्ठभंडिलपुष्पावतंसौ कर्णभूषणे शिरीषस्क कपितनः भंडि
लोपीत्यमरः शैवालेषु जलनीलीषु जलनीलीतु शैवालं शैवलमित्यमरः लोलाः सतृष्णा येऽलिकुला भ्रमरास्तान्
स्फुतरामत्यर्थम् चलयतः प्रादुर्भावयतः शैवालप्रियतालयोस्तज्जंसाने प्रादुर्भवंतीति भावः ॥ ६७ ॥ ॥ ॥१६॥

तस्येति तस्य श्रीहरेः समानूनाधिकत्वरहिता निस्तुलावर्तुला च निम्ना गंभीरा च या नाभिस्तस्याः श्रियं शोभां अ
वलोक्य आवर्तसंहतिर्जलभ्रमसमूहः स्यादावर्तोंभसां भ्रम इत्यमरः बहुविस्मयेन आदरात्प्रार्थ्येण प्राप्तुं तुलं वि
चित्रं नृत्यं भेजे भेजे प्राप्तवती वेसुस्त्रेक्षा किंच तुल्यत्वातिचया हीरीक्षणीयारम्यत्वादर्शनीयातस्य भ्रूकुटिः भंगीश्रियं
तरंगशोभाम् अजयज्जीतवती ॥ ६८ ॥ निःशेषेति निःशेषं समग्रं विच्युतं विगलितं मनोज्ञं रम्यं तमालपत्रं तिल

तस्यावलोक्य समनिस्तुलनिम्ननाभेरावर्तसंहतिरिव श्रियमाप्तुमभेजे ॥ नृत्यं विचित्रमतयत्कुविस्मयेन भंगी श्रियं
भ्रूकुटिरुत्तरलेक्षणीया ॥ ६८ ॥ निःशेषविच्युतमनोज्ञतमालपत्रो विश्लेषिकर्णरुचिराभरणः स्फुरम्यः ॥ पाथोम
हाविहरणाकुलितोपि वेषस्तस्याननस्य समभूत्किल कांतिधाम्नः ॥ ६९ ॥ उत्क्रायतां मधुरगीतसमारतालिमाधुर्य
तोः स्वविलयांकुनकुलानि तेयाम् ॥ अंतर्हितामचयपुर्जललतावलीषु प्रादुर्भवेस्मरजितः पुरतः कएव ॥ ७० ॥ कंप
स्मिन् सतथोक्तः विश्लेषिणी वियोगिनी कर्णयोरुचिरे रम्ये आभरणे यस्मिन्सतथोक्तः एवं पाथसि जले यो म
हाविहारस्तेनाकुलितो विच्युलितोपि कांतिधाम्नस्तस्य श्रीहरेः आननस्य मुखस्य वेषो नेपथ्यं स्फुतरां रम्यः स
मभूत् किलेति निश्चितम् रम्याणां विकृतिरपि श्रियं तनोतीति भावः ॥ ६९ ॥ उत्क्रायतामिति उत्क्रायतामुच्चस्वरेण

हरिसं. श्रीहरियत्रोनिबद्धप्राकृतपद्यानि कीर्त्तयतां तेषां भक्तजनानाम् माधुर्यतो मधुरत्वेन हेतुना मधुरं यत्कीर्तनगानं सर्ग.१५
॥१७॥ तेन सम आरवः नादो येषां तानि तथोक्तानि आरविलापयेनः कुंतोः पक्षिणस्तेषां कुलानि वृंदानि जलजानां प
द्मानीमावलीषु पंक्तिषु अंतर्द्धितां अंतर्धानतां ययुः तथा हि परेण तितः परभूतः कएव जनः पुरतोस्ये प्रादुर्भ
वेत् प्रसक्षोभवेत्कोपी समर्थः अर्थांतरन्यासोलंकारः॥१०॥ तीरस्थितैरिति तत्कलापैरुच्चबर्हैः सरभसैः सानं
दैः गीतध्वनिश्रवणान्मेघनादशंकया प्रसन्नैरित्यर्थः स्निग्धस्वनैराश्चर्योत्पन्नमधुरनादैः विस्मयात् ब्रुवतिभि

तीरस्थितैः किंचित्शिखंडिभिरुत्कलापैः स्निग्धस्वनैः सरभसैरभिवंद्यमानम्॥ श्रोत्रेषु मूर्छति मनोज्ञतरं स्म तेषां गी
तानुसारि चिरतारिमृदंगवाद्यम्॥११॥ प्राप्तस्तैरिति समतदं विरुतसमार्ह नेपथ्यं महद दधदाश्रितैर्निखिलैः॥ सोत्कं
ठैः स्वपरयन्नग हरौ वृत्तस्तैर्गायद्भिर्निलयमगात् सतूर्यनादम्॥१२॥ यथो भयाद्यीमत्रउदारहृत इति दिंतिलः तीरस्थि
तैः शिखंडिभिर्मयूरैः अभिवंद्यमानं स्तूयमानं मनोज्ञतरं तेषां भक्तजनानां संबंधि गीतानुसारिगानानुकूलं चिरं
श्रेष्ठं चारितलं तदेवमृदंगस्तस्य वाद्यं वाद्यध्वनिः श्रोत्रेषु कर्णेषु मूर्छति स्म आप्नोति स्म किलेति प्रसिद्धे चैतत्॥
११॥ प्राप्त इति इतिपूर्वोक्तप्रकारेण तैर्भक्तजनैः सार्द्धं विरुतस्य विक्रीअस्य भक्तकरं गृहीत्वेति शेषः तटं पुलिनं प्रा ॥१७॥

प्तः नेपथ्यं वेषं दधत् हरौ तु रंगे निषण्ण उपविष्टः सोत्कंठैः सप्रेमभिः आश्रितैर्निजाश्रयंगतैः स्वस्वपरमुत्कृष्टं प
द्यं गायद्भिः तैरस्नुवारादिभिः वृत्तो वेष्टितः सश्रीहरिः सतूर्यनादं वाद्यघोषसहितं यथा तथा निलयं स्वनि
वासस्थानम् अगात् अगच्छत् प्रहर्षणीवृत्तं लक्षणं तूक्तं प्राक्॥१२॥ अथेति अथ जलकेलिं विधाय स्वा
वासागमनानंतरम् प्रभुः प्राप्ताश्रितानानूपपापवतां जनानाम विश्रेयो विधाने स्वतंत्रतया समर्थः स्वस्यात्मनः
पदे चरणे रतिर्नस्माधारणायत्री निर्विघ्नतेः स्पेतिनि तथोक्तः तदस्मस्मिन्निति मतुविनिमतु पृ तथाभूतो यम् आ

अथ स निजजनैर्विचिंत्य सार्द्धं प्रभुरभिगंतुमियेष जीर्णदुर्गम्॥ स्वपदरतिमदाश्रितोपकर्तो बहुजनमोक्षविधि
कारणमकामः॥१३॥ इतिश्री हरिसंभवे महाकाव्ये हर्यंकेक कविश्रीमद्दचिंतानंदवर्णिकृते श्रीहरिप्रभावादिवर्णन
नामा पंचदशः सर्गः॥१५॥ श्रितोति जीर्णदुर्गनगरीयहेमंतसिंहाख्यो निजभक्तस्तेनोपकृतो हूतं स्नेष्ठ्याहूतः स
श्रीहरिः आप्तकामः स्वस्वरूपेण परिपूर्णोपि बहवो नेके ये जनास्तेषां मोक्षविधिः कारणं संति कश्रेयो विधातुं कर्तु
मिच्छुः सन् निजान् आत्मीयान् ये जना एकांतिकभक्तास्तैः सार्द्धं साकम् विचिंत्य गमनविचारं कृत्वा जीर्णदुर्गं जीर्णदु
र्गाख्यनगरम् अभिगंतुम् इयेष इच्छति स्म पुष्पिताग्रावृत्तं लक्षणं तूक्तं प्राक्॥१३॥ इतिश्री पदवाक्यप्रमा

णापारावारीणधुरीणविश्वनाथभट्टात्मजदीनानाथभट्टशिष्यश्रीप्रत्यक्षवासुदेवश्रीसहजानंदस्वामिच

रणकमलोपासकगोपालानंदमुनिमंतःप्रेरितमतिमाधवदाससत्सहायमासाद्यटंकदयाशंकरात्मजश्री

हरिकृष्णैकभक्तभोलानाथकृतौ श्रीहरिसंभवकाव्यस्य विवृत्तिनाम्न्यां दिग्मात्रप्रकाशिकायां पंचदशः सर्गः॥

१५॥ लि॰ रावलजेवामोरारजी संवत् १९५६ नाफागणशुदी ५ नेदीवसे श्रीमेथाणग्रामेसमाप्ता॥श्री॥